

# Sri Shanaishcara Stotram – Dasharatha – Skanda Puranam

## ॥ श्रीशनैश्चर स्तुति - दशरथ कृतं - स्कन्द पुराणम् ॥

The following is a rare hymn **Lord Shani (Saturn)** by **King Dasharatha**. This hymn is available in **Skanda Purana**, **Prabhasa Khanda**, **Prabhasa Mahatmya**, **Shanaishcareshwara Mahatmya**, **Chapter 49**. This hymn was created by King Dasharatha when he prayed Shani not to pass through Rohini Nakshatra, which was said to create severe drought for 12 years.

Pleased with this hymn, Lord Shani grants a boon to King Dasharatha such that his empire will not be adversely affected by his transit and he also grants that anyone who chants this hymn once or twice a day after due prayer to him will not see the ill effects of Saturn transiting through Janma Lagna, 8th house and other adverse houses as well as Saturn Dasha or Antardasha (Bhukti, Antara).

ईश्वर उवाच -

वरद्वयं ततः प्राप्य हृष्टरोमा स पार्थिवः ।
रथोपरि धनुर् मुक्त्वा भूत्वा चैव कृताञ्जलिः ॥ १ ॥

ध्यात्वा सरस्वतीं देवीं गणनाथं विनायकम् ।
राजा दशरथः स्तोत्रं सौरेर् इदमथाकरोत् ॥ २ ॥

रजोवाच -

नमो नीलमयूखाय नीलोत्पल निभाय च ।
नमो निर्मांस देहाय दीर्घ स्मश्रु जटाय च ॥ १ ॥

नमो विशाल नेत्राय शुष्कोदर भयानक ।
नमः पुरुष गात्राय स्थूलरोमाय वै नमः ॥ २ ॥

नमो नित्यं क्षुधार्त्ताय नित्य तप्ताय वै नमः ।
नमः कालाग्नि रूपाय कृतान्तक नमोऽस्तु ते ॥ ३ ॥

नमो दीर्घाय शुष्काय कालदृष्टे नमोऽस्तु ते ।
नमस्ते कोटराक्षाय दुर्निरीक्ष्याय वै नमः ॥ ४ ॥

नमो घोराय रौद्राय भीषणाय करालिने ।
नमस्ते सर्व भक्षाय वलीमुख नमोऽस्तु ते ॥ ५ ॥

सूर्यपुत्र नमस्तेऽस्तु भास्करे भय दायक ।
अधोदृष्टे नमस्तुभ्यं वपुः श्याम नमोऽस्तु ते ॥ ६ ॥

नमो मन्दगते तुभ्यं निस्त्रिंशाय नमो नमः ।
नमस्ते उग्ररूपाय चण्डतेजाय ते नमः ॥ ६ ॥

तपसा दग्ध देहाय नित्यं योगरताय च ।
नमस्ते ज्ञान नेत्राय कश्यपात्मज सूनवे ॥ ७ ॥

तुष्टो ददासि वै राज्यं रुष्टो हरसि तत्क्षणात् ।
देवा ऽ सुर मनुष्याश् च पशु पक्षी सरीसृपाः ॥ ८ ॥

त्वया विलोकिताः सौरे दैन्यमाशु व्रजन्ति च ।
ब्रह्मा शक्रो यमश् चैव ऋषयः सप्त तारकाः ॥ ९ ॥

राज्य भ्रष्टाश् च ते सर्वे तव दृष्ट्या विलोकिताः ।
देशाश् च नगर ग्रामा द्वीपाश् चैवा ऽ द्रयस् तथा ॥ १० ॥

रौद्र दृष्ट्या तु ये दृष्टाः क्षयं गच्छन्ति तत्क्षणात् ॥ ११ ॥

प्रसादं कुरु मे सौरे वरार्थेऽहं तवाश्रितः ।
सौरे क्षमस्वा ऽ पराधं सर्व भूत हिताय च ॥ १२ ॥

शनिरुवाच -

ग्रहाणां दुर्ग्रहो ज्ञेयो ग्रहपीडां करोम्यहम् ।
अदेयं प्रार्थितं राजन् किञ्चिद् युक्तं ददाम्यहम् ॥ १ ॥

त्वया प्रोक्तं मम स्तोत्रं ये पठिष्यन्ति मानवाः ।
पुरुषाश् च स्त्रियो वापि मद् भयेनोपपीडिताः ॥ २ ॥

देवासुर मनुष्यास् तु सिद्ध विद्याधरोरगाः ।
मृत्यु स्थाने स्थितो वापि जन्म प्रान्त गतस् तथा ॥ ३ ॥

एककालं द्विकालं वा तेषां श्रेयो ददाम्यहम् ।
पूजयित्वा जपेत् स्तोत्रं भूत्वा चैव कृताञ्जलिः ॥ ४ ॥

तस्य पीडां च चैवाहं इह कुर्यां कदाचन ।
जन्म स्थाने स्थितो वापि मृत्यु स्थाने स्थितोऽपि च ॥ ५ ॥

जन्म ऋक्षे च लग्ने च दशास्वन्तर्दशासु च ।
रक्षामि सततं तस्य पीडां चान्य ग्रहस्य च ॥ ६ ॥

अनेनैव प्रकारेण पीडा मुक्तस् त्वसौ भवेत् ।
एतत् प्रोक्तं मया दत्तं वरं च रघु नन्दन ॥ ७ ॥

---

**.. इति श्रीस्कान्दे महापुराणे एकाशीति साहस्र्यां संहितायां प्रभास खण्डे प्रभास क्षेत्र माहात्म्ये शनैश्चरेश्वर माहात्म्ये दशरथ कृत श्रीशनैश्चर स्तोत्रं सम्पूर्णम् ..**